International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 25-26
© 2026 IJMH
www.themultijournal.com
Received: 25-02-2026
Accepted: 07-03-2026
Publish : 09-03-2026

**एस्. विष्णुप्रिया**
शोधच्छात्रा , साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः.
तिरुपतिः

**Correspondence:**
**एस्. विष्णुप्रिया**
शोधच्छात्रा , साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः.
तिरुपतिः

# कुवलयानन्ददिशा ललितालङ्कारविमर्शः

**एस्. विष्णुप्रिया**

साहित्यशास्त्रस्य अलङ्कारग्रन्थेषु अनेके अद्वितीयाः विषयाः आलोडिताः। तत्र रसः यद्यपि प्रथमं स्थानमावहति, तथापि गुणः रीतिः, वृत्तिः इत्यन्येऽपि विषयाः समुल्लसन्ति। अत एव सङ्क्षेपेण काव्यप्रमेयविषयाः प्रतापरुद्रीये इत्थं प्रतिपादिताः।

**रसप्रधानाः शब्दार्थाः गुणालङ्कारवृत्तयः।**
**रीतयश्चेयती शास्त्रप्रमेयं काव्यपद्धतिः॥**[1]

अत्र इदमस्माभिः परिलक्षयितुं शक्यते यत् अलङ्कारोऽपि साहित्यशास्त्रप्रमेयेषु अन्यतमो वर्तते। काव्यपुरुषस्य भूषणस्थाने अलङ्काराः विराजन्ते, यथा

**शब्दार्थौ मूर्त्तिराख्यातौ जीवितं व्यङ्ग्यवैभवम्।**
**हारादिवदलङ्कारास्तत्र स्युरुपमादयः॥**[2]

अयं च अलङ्कारः शब्दालङ्कारः अर्थालङ्कारः इति द्विविधो भाति। तत्र अर्थालङ्काराः उपमादयः प्रसिद्धाः एव। एतान् अलङ्कारविशेषान् अप्पय्यदीक्षितेन्द्राः चन्द्रालोकग्रन्थाधारेण कुवलयानन्दः इति स्वीये ग्रन्थे बालानां सरलव्युत्पत्त्यर्थं विस्तारयामासुः। तदेव आहुः

**अलङ्कारेषु बालानाम् अवगाहनसिद्धये।**
**ललितः क्रियते तेषां लक्ष्यलक्षणसङ्ग्रहः॥**
**येषां चन्द्रालोके दृश्यन्ते लक्ष्यलक्षणश्लोकाः।**
**प्रायस्ते एव तेषामितरेषां त्वभिनवा विरच्यन्ते॥**[3]

तत्र उपमादयः अलङ्काराः क्रमेण चारु चर्चिताः। तेषु अलङ्कारेषु अन्यतमो भवति ललितालङ्कारः इति।

तस्य एवं लक्षणमुदाहरणञ्च वर्तते

**वर्ण्ये स्याद्वर्ण्यवृत्तान्तप्रतिबिम्बस्य वर्णनम्।**
**ललितं निर्गते नीरे सेतुमेषा चिकीर्षति॥**[4]

लक्षणस्य विवरणम् – प्रस्तुते धर्मिणि यः वर्णनीयो वृत्तान्तः तमवर्णयित्वा, तस्मिन् एव धर्मिणि तत्प्रतिबिम्बभूतस्य अन्यस्य कस्यचिद्वृत्तान्तस्य वर्णनं ललितालङ्कारः। उदाहरणस्य अर्थो भवति, काचन नायिका अनुगतम् आगतमपि प्रियमुपेक्ष्य तदुत्तरं यदा सः अन्यासक्तमनाः तदा तस्य अनुनयनार्थं कामपि सखीं दूतीं कृत्वा प्रेषयति। तदा तस्याः एतादृशकार्यं दृष्ट्वा तत्सख्याः वचनमिदम्। इयं नायिका नीरे जले निर्गते अपगते तत्र सेतुं चिकीर्षति इति।

त त्र च प्रकृतालङ्कारसमन्वयो भवति। नायिकायां अपगते नायके निष्प्रयोजनं तदनुसरणं वर्णनीयं प्रकृतम्। किन्तु तदवर्णयित्वा तत्रैव नायिकायामेव तत्प्रतिबिम्बभूतस्य अपगतजलसेतुबन्धनस्य वर्णनात्, वर्ण्ये अवर्ण्यप्रतिबम्बवर्णनरूपः ललितालङ्कारः।

**क्लृप्तालङ्कारेषु एतदलङ्कारान्तर्भावविचारः**

**अप्रस्तुतप्रशंसा**

अस्य अलङ्कारस्य विद्यमानेषु एव अलङ्कारेषु अन्तर्भावशङ्का तन्निरासश्च ग्रन्थे प्रस्तूयते, तदत्र यथामति उपस्थाप्यते

आदौ अप्रस्तुतप्रशंसायाम् अन्तर्भावशङ्का

**अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया।**
**एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते॥**[5]

अप्रस्तुतप्रशंसायाम् अप्रस्तुतवृत्तान्तवर्णनेन प्रस्तुतः व्यङ्ग्यो भवति। अत्रापि ललिते समानस्थितेः सत्वात्, अप्रस्तुततप्रशंसायामेव अस्य अन्तर्भावो भवतु इति चेत्, न। अप्रस्तुतप्रशंसालङ्कारे अप्रस्तुतवृत्तान्तः अप्रस्तुते एव धर्मिणि वर्ण्यते। यथा एकः कृती शकुन्तेषु इति उदाहरणे पक्षिषु अप्रकृतेषु प्रकृतसदृशान्यायचानं वर्णितम्। अत्र तु प्रस्तुते एव धर्मिणि अप्रस्तुतं वर्ण्यते इति भेदः।

**समासोक्तिः**

**समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्।**
**अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः॥**[6]

प्रस्तुतवर्णनेन विशेषणबलात् यत्र अप्रस्तुतस्य स्फूर्तिः तत्र समासोक्तिरलङ्कारः। ललिते तु अप्राकरणिकवर्णनेन प्रकृतं स्फुरति इति स्वरूपभेदः अतः समासोक्तौ अस्य अन्तर्भावो न शङ्कनीयः।

**निदर्शना**

**वाक्यार्थयोस्सदृशयोरैक्यारोपो निदर्शना।**
**यद्दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता॥**

यत्र उपमेयावाक्यार्थस्य उपमानवाक्यार्थस्य च शब्दोपात्तयोः ऐक्यारोपः तत्र निदर्शनालङ्कारः। अत्रापि द्वयोः ऐक्यारोपः इति अंशमादाय अस्य ललितालङ्कारस्य निदर्शनायामेव अन्तर्भावो भवतु, मास्तु च पृथक् कश्चन अलङ्कारः इति चेन्, न। यतो हि अत्र अनयोः अलङ्कारयोः अयं भेदः विराजते यत्, यत्र उपमेयवाक्यम् उपमानवाक्यमिति द्वयमपि शब्दोपात्तं तत्रैव निदर्शना। अत्र तु केवलं उपमानवाक्यं शब्दोपात्तं भवति, न च उपमेयवाक्यम्, अतः अत्र अन्तर्भावशङ्का न कार्या।

तथापि भवतु अन्तर्भावः इति पूर्वपक्षी आक्षिपति, विषयविषयिणोरेकेन उपात्तेन अनुपात्तेन वा अलङ्कारे भेदो नास्ति। अतश्च प्रथग्ग्रहणं मास्तु। इति चेत्, अत्र उच्यते। यदि विषयविषयिणोः शब्दोपात्तयोः प्रवर्तमान एव अलङ्कारः विषयिमात्रोपादानेऽपि स्यात्, तर्हि अन्यत्र क्लेशः। कुत्र इति चेत्, रूपकातिशयोक्त्योः एकत्वं स्यात्। यतो हि रूपकस्य रूपकातिशयोक्तेश्च अयमेव भेदो यत् रूपके विषयविषयिणोः द्वयोः अपि उपादानम्। अतिशयोक्तौ केवलं विषयिणः इति। तथा च तत्रापि अलङ्कारभेदो न स्यात्। अतः न चास्य निदर्शनायामन्तर्भावः।

**अतिशयोक्तिः**

**रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः।**
**पश्य नीलोत्पलद्वन्द्वान्निस्सरन्ति शिताः शराः॥**[7]

प्रस्तुते अप्रस्तुतारोपवर्णनात् ललितस्य अत्र अन्तर्भाव इति चेत्, सादृश्यमूलायाः अप्रस्तुतप्रशंसायाः अपि अतिशयोक्तौ अन्तर्भावः प्रस्तुते अप्रस्तुतारोपणात्। अतः न अन्तर्भावः इति चेत्। अप्रस्तुतप्रशंसायाम् अप्रस्तुतवृत्तान्तो अप्रकृतधर्मिणि वर्ण्यते, पुनश्च तत्र प्रस्तुतं व्यज्यते। अतिशयोक्तौ तु प्रस्तुतं लक्ष्यते इति कृत्वा भेदः।

तथा च ललितातिशयोक्त्योरपि तावानेव भेदो यत् अतिशयोक्तौ प्रस्तुतं लक्ष्यते. ललिते तु व्यञ्जितं भवति। अतो नापि अतिशयोक्तौ अन्तर्भावः। अतः ललितालङ्कारः न क्लृप्तालाकङ्कारेषु अन्तर्लीनः अपि तु स्वतन्त्र एव कश्च विलक्षणः अलङ्कारः भ्राजते। अत्र च इतोपि सूक्ष्मो विचारः ग्रन्थे संविहितः।

अस्य अलङ्कारस्य अन्यत् प्रसिद्धमुदाहरणं भवति

**क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।**
**तितीर्षुर्दुस्तरं मोहात् उडुपेनास्मि सागरम्।।**[8]

अत्र कालिदासे एव अप्रस्तुतस्य सागरतरणस्य वृत्तान्तस्य वर्णनेन, महतः रघुवंशस्य वर्णनरूपवृत्तान्तः व्यज्यते इति ललितालङ्कारः।

**सन्दर्भग्रन्थसूची**

1. प्रतापरुद्रीयम्

2. कुवलयानन्दः

**पादटिप्पन्यः-**

[1]प्रतापरुद्रीयम् – 1-4

[2]प्रतापरुद्रीयम् – 2-2

[3]कुवलयानन्दः - 3

[4]कुवलयानन्दः -128

[5]कुवलयानन्दः -66

[6]कुवलयानन्दः -53

[7]कुवलयानन्दः -36

[8]रघुवंशम् -1-2